# Bhagavannamanusaram Phalapraptih

# ભગવન્નામાનુસારં ફલપ્રાપ્તિઃ

## Document Information

Text title : Bhagavannamanusaram Phalapraptih

File name : bhagavannAmAnusAraMphalaprAptiH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 24

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# ભગવન્નામાનુસારં ફલપ્રાપ્તિઃ

એકસ્યૈવ સતસ્તસ્ય બ્રહ્મણો દ્વિજસત્તમ ।
નામ્નાં બહુત્વં લોકાનામુપકારકરં શ઼ૃણુ ॥ ૧૦॥

નિમિત્તશક્તયો નામ્નો ભેદતસ્તદુદીરણાત્ ।
વિભિન્નાન્યેવ સાધ્યન્તે ફલાનિ કુરુનન્દન ॥ ૧૧॥

યચ્છક્તિ નામ તત્તસ્ય તત્તસ્મિન્નેવ વસ્તુનિ ।
સાધકં પુરુષવ્યાઘ્ર સૌમ્યક્રૂરેષુ વસ્તુષુ ॥ ૧૨॥

વાસુદેવાચ્યુતાનન્તસત્યાજ્ય?પુરુષોત્તમૈઃ ।
પરમાત્મેશ્વરાદ્યૈશ્ચ સ્તુતો નામભિરવ્યયઃ ॥ ૧૩॥

નિમિત્તભાવં ભગવાન્વિમુક્તેર્યાત્યધોક્ષજઃ ।
તથાન્યકાર્યસંસિદ્ધૌ યદ્યત્તત્તન્નિશામય ॥ ૧૪॥

ધનકૃદ્ધર્મકૃદ્ધર્મી ધર્માત્મા વિશ્વકૃચ્છુચિઃ
શુચિષદ્વિષ્ણુરબ્જાક્ષઃ પુષ્કરાક્ષો હ્યધોક્ષયઃ ।
શુચિશ્રવાઃ શિપિવિષ્ટો યજ્ઞેશો યજ્ઞભાવનઃ ॥ ૧૫॥

નામ્નામિત્યેવમાદીનાં સમુચ્ચારણતો નરઃ ।
ધર્મં મહાન્તમાપ્નોતિ પાપબન્ધક્ષયં તથા ॥ ૧૬॥

તથાર્થપ્રાપ્તયે બ્રહ્મન્દેવનામાનિ મે શ઼ૃણુ ।
યેષાં સમુચ્ચારણતો વિત્તમાપ્નોતિ ભક્તિમાન્ ॥ ૧૭॥

શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીધરઃ શ્રીનિકેતનઃ ।
શ્રિયઃ પતિઃ શ્રીપરમઃ શ્રીમાન્ શ્રીવત્સલાઞ્છનઃ ॥ ૧૮॥

નૃસિંહો દુષ્ટદામનો જયો વિષ્ણુસ્ત્રિવિક્રમઃ ।
સ્તુતઃ પ્રયચ્છતે ચાર્થમેવમાદિભિરચ્યુતઃ ॥ ૧૯॥

કામ્યઃ કામપ્રદઃ કાન્તઃ કામપાલસ્તથા હરિઃ ।

આનન્દો માધવશ્ચૈવ કામસંસિદ્ધયે નૃપ ॥ ૨૦॥

રામઃ પરશુરામશ્ચ નૃસિંહો વિષ્ણુરેવ ચ ।
વિક્રમશ્ચૈવમાદીનિ જપ્યાન્યરિજિગીષુભિઃ ॥ ૨૧॥

વિદ્યામભ્યસતા નિત્યં જપ્તવ્યઃ પુરુષોત્તમઃ ।
દામોદરં બન્ધગતો નિત્યમેવ જપન્નરઃ ॥ ૨૨॥

કેશવં પુણ્ડરીકાક્ષં પુષ્કરાક્ષં તથા જપેત્ ।
નેત્રબાધાસુ સર્વાસુ હૃષીકેશં ભયેષુ ચ ॥ ૨૩॥

અચ્યુતં ચામૃતં ચૈવ જપેદૌષધકર્મણિ ।
ભ્રાજિષ્ણુમગ્નિહાનૌ ચ જપેદાલમ્બને સ્થિતમ્ ॥ ૨૪॥

સઙ્ગ્રામાભિમુખં ગચ્છન્સંસ્મરેદપરાજિતમ્ ।
પાતાલનરસિંહં ચ જલપ્રતરણે સ્મરેત્ ॥ ૨૫॥

ચક્રિણં ગદિનં ચૈવ શાર્ઙ્ગિણં ખડ્ગિનં તથા ।
ક્ષેમાર્થે પ્રસવન્રાજન્દિક્ષુ પ્રાચ્યાદિષુ સ્મરેત્ ॥ ૨૬॥

અજિતં ચાધિકં ચૈવ સર્વં સર્વેશ્વરં તથા ।
સંસ્મરેત્પુરુષો ભક્ત્યા વ્યવહારેષુ સર્વદા ॥ ૨૭॥

નારાયણં સર્વકાલં ક્ષુતપ્રસ્ખલિતાદિષુ ।
ગ્રહનક્ષત્રપીડાસુ દેવબાધાટવીષુ ચ ॥ ૨૮॥

દસ્યુવૈરિનિરોધેષુ વ્યાઘ્રસિંહાદિસઙ્કટે
અન્ધકારે ચ તીવ્રે ચ નરસિંહમનુસ્મરેત્ ।
તરત્યખિલદુર્ગાણિ તાપાર્તો જલશાયિનમ્ ॥ ૨૯॥

ગરુડધ્વજાનુસ્મરણાદાપદ્ભ્યો મુચ્યતે નરઃ ।
જ્વરદુષ્ટશિરોરોગવિષવીર્યં પ્રશામ્યતિ ॥ ૩૦॥

સ્નાને દેવાર્ચને હોમે પ્રણિપાતે પ્રદક્ષિણે ।
કીર્તયેદ્ભગવન્નામ વાસુદેવેતિ તત્પરઃ ॥ ૩૧॥

સ્થગને વિત્તધાન્યાદેરપધ્યાને ચ દુષ્ટજે ।
કુર્વીત તન્મના ભૂત્વા અનન્તાચ્યુતકીર્તનમ્ ॥ ૩૨॥

નારાયણં શાર્ઙ્ગધરં શ્રીધરં પુરુષોત્તમમ્ ।
વામનં ખડ્ગિનં ચૈવ દુઃસ્વપ્નેષુ ચ સંસ્મરેત્ ॥ ૩૩॥

એકાર્ણવાહિપર્યઙ્કશાયિનં ચ નરઃ સ્મરેત્ ।
વાય્વગ્નીગૃહદાહાય પ્રવૃદ્ધાવુપલક્ષ્ય ચ ॥ ૩૪॥

વિદ્યાર્થી મોહવિભ્રાન્તિવેગાઘૂર્ણિતમાનસઃ ।
મનુષ્યો મુનિશાર્દૂલ સદાશ્વશિરસં સ્મરેત્ ॥ ૩૫॥

બલભદ્રં સમૃદ્ધ્યર્થી સીરકર્મણિ કીર્તયેત્ ।
જગત્સૂતિમપત્યાર્થી સ્તુવન્ભક્ત્યા ન સીદતિ ॥ ૩૬॥

જમ્બવ્યં સુપ્રજાખ્યં તુ દેવદેવસ્ય સત્તમ ।
દમ્પત્યોરાત્મસમ્બન્ધે વિવાહાખ્યે પુનઃ પુનઃ ॥ ૩૭॥

શ્રીશં સર્વાભ્યુદયિકે કર્મણિ સમ્પ્રકીર્તયેત્ ।
અરિષ્ટાન્તેષ્વશેષેષુ વિશોકં ચ સદા જપેત્ ॥ ૩૮॥

મરુત્પ્રતાપાગ્નિજલબન્ધનાદિષુ મૃત્યુષુ ।
સ્વાતન્ત્ર્યપરતન્ત્રેષુ વાસુદેવં જપેદ્બુધઃ ॥ ૩૯॥

સર્વાર્થશક્તિયુક્તસ્ય દેવદેવસ્ય ચક્રિણઃ ।
યદ્વાભિરોચતે નામ તત્સર્વાર્થેષુ કીર્તયેત્ ॥ ૪૦॥

સર્વાર્થસિદ્ધિમાપ્નોતિ નામ્નામેકાર્થતા યતઃ ।
સર્વાણ્યેતાનિ નામાનિ પરસ્ય બ્રહ્મણોઽનઘ ॥ ૪૧॥

એવમેતાનિ નામાનિ દેવદેવસ્ય કીર્તયેત્
યં યં કામમભિધ્યાયેત્તં તમાપ્નોત્યસંશયમ્ ।
સર્વાન્કામાનવાપ્નોતિ સમારાધ્ય જગદ્ગુરુમ્ ॥ ૪૨॥

તન્મયત્વેન ગોવિન્દમિત્યેતદ્દાલ્ભ્ય નાન્યથા ।
તન્મયો વાઞ્છિતાન્કામાન્યદવાપ્નોતિ માનવઃ ॥ ૪૩॥

ઇતિ વિષ્ણુધર્મેષુ ચત્વારિંશોઽધ્યાયાન્તર્ગતા
ભગવન્નામાનુસારં ફલપ્રાપ્તિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Bhagavannamanusaram Phalapraptih*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*